শ্রীঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥শ্রীকৃষ্ণমঙ্গলম্ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

---

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীকৃষ্ণমঙ্গলম্ ॥

মঙ্গলং যাদৱেন্দ্রায মহনীযগুণাব্ধযে।
ৱসুদেৱতনূজায ৱাসুদেৱায মঙ্গলম্॥ ১ ॥

কিরীটকুণ্ডলভ্রাজদলকৈর্যন্মুখশ্রিযে।
শ্রীৱৎসকৌস্তুভোদ্ভাসি ৱক্ষসে চাস্তু মঙ্গলম্॥ ২ ॥

নীলাম্বুদনিকাশায ৱিদ্যুৎসদৃশৱাসসে।
দেৱকীৱসুদেৱাভ্যাং সংস্তুতাযাস্তু মঙ্গলম্॥ ৩ ॥

তাভ্যাং সংপ্রার্থিতাযাথ প্রাকৃতার্ভকরূপিণে।
যশোদায গৃহং পিত্রা প্রাপিতাযাস্তু মঙ্গলম্॥ ৪ ॥

পূতনাসুপযঃপানপেশলাযাসুরারিণে।
শকটাসুরৱিধ্ৱংসি পাদপদ্মায মঙ্গলম্॥ ৫ ॥

যশোদালোকিতে স্ৱাস্যে ৱিশ্ৱরূপপ্রদর্শিনে।
মাযামানুষরূপায মাধৱাযাস্তু মঙ্গলম্॥ ৬ ॥

তৃণাৱর্তদনূজাসু হারিণে শুভকারিণে।
ৱৎসাসুরপ্রভেত্রে চ ৱৎসপালায মঙ্গলম্॥ ৭ ॥

দামোদরায ৱীরায যমলার্জুনপাতিনে।
ধাত্রাহৃতানাং ৱৎসানাং রূপধর্ত্রেস্তু মঙ্গলম্॥ ৮ ॥

ব্রহ্মস্তুতায কৃষ্ণায কালীযফণনৃত্যতে।
দাৱাগ্নিরক্ষিতাশেষ গোগোপালায মঙ্গলম্॥ ৯ ॥

গোৱর্ধনাচলোদ্ধর্ত্রে গোপীক্রীডাভিলাষিণে।
অঞ্জল্যাহৃতৱস্ত্রাণাং সুপ্রীতাযাস্তু মঙ্গলম্॥ ১০ ॥

সুদর্শনাখ্যগন্ধর্ৱ শাপমোক্ষণকারিণে।
শঙ্খচূডশিরোহর্ত্রে ৱৃষভঘ্নায মঙ্গলম্॥ ১১ ॥

গান্দিনীসুতসন্দৃষ্ট দিৱ্যরূপায শৌরিণে।
ত্রিৱক্রযা প্রার্থিতায সুন্দরাঙ্গায মঙ্গলম্॥ ১২ ॥

গন্ধমাল্যাম্বরাঢ্যায গজরাজৱিমর্দিনে।
চাণূরমুষ্টিকপ্রাণহারিণে চাস্তু মঙ্গলম্॥ ১৩ ॥

কংসহন্ত্রে জরাসন্ধবলমর্দন কারিণে।
মধুরাপুরৱাসায মহাধীরায মঙ্গলম্॥ ১৪ ॥

মুচুকুন্দমহানন্দদাযিনে পরমাত্মনে।
রুক্মিণীপরিণেত্রে চ সবলাযাস্তু মঙ্গলম্॥ ১৫ ॥

দ্বারকাপুরৱাসায হারনূপুরধারিণে।
সত্যভামাসমেতায নরকঘ্নায মঙ্গলম্॥ ১৬ ॥

বাণাসুরকরচ্ছেত্রে ভূতনাথস্তুতায চ।
ধর্মাহূতায যাগার্থং শর্মদাযাস্তু মঙ্গলম্॥ ১৭ ॥

কারযিত্রে জরাসন্ধৱধং ভীমেন রাজভিঃ।
মুক্তৈস্সস্তুতায ততপুত্ররাজ্যদাযাস্তু মঙ্গলম্॥ ১৮ ॥

চৈদ্য তেজোপহর্ত্রে চ পাণ্ডৱপ্রিযকারিণে।
কুচেলায মহাভাগ্যদাযিনে তেস্তু মঙ্গলম্॥ ১৯ ॥

দেৱ্যষ্টকসমেতায পুত্রপৌত্রযুতায চ।
ষোডশস্ত্রী সহস্রৈস্তু সংযুতাযাস্তু মঙ্গলম্॥ ২০ ॥

যশশিষ্টরক্ষণপরঃ করুণাংবুরাশিঃ
দুষ্টাসুরাংশনৃপতীন্ ৱিনিগৃহ্য শূরান্।
কষ্টাং দশাং অপনুদন্তরসা পৃথিৱ্যাঃ
পুষ্টিং দদাতু স হরিঃ কুলদৈৱতং নঃ॥ ২১ ॥

॥ ইতি শ্রীকৃষ্ণমঙ্গলং সম্পূর্ণম্॥